# KURUKSHETRA UNIVERSITY
# KURUKSHETRA

(Established by the State Legislature Act XII of 1956)
**("A" Grade, NAAC Accredited)**

**SCHEME, SYLLABUS AND COURSES OF READING**

**FOR**

**M. A. SANSKRIT (FINAL)**

**Semesters : III & IV**

**(Effective from the Session : 2009-2010)**

| | | |
|---|---|---|
| **Semester – III** | **Examination :** | **December, 2009** |
| **Semester – IV** | **Examination :** | **May, 2010** |


*Published by:*
REGISTRAR
KURUKSHETRA UNIVERSITY
KURUKSHETRA

**Can be had from:**
**Manager**
**Printing & Publications**
**Kurukshetra University**
**KURUKSHETRA – 136 119**

**Price:**
**Rs (At counter)**
**Rs (By Regd. Book-Post)**

कुरुक्षेत्रविश्वविद्यालयः, कुरुक्षेत्रम्
(1956 तम-वर्षगत-राज्यविधायिका-अधिनियम-XII-द्वारा स्थापितः)
("ए" श्रेणी, नाक-प्रत्यायितः)

**KURUKSHETRA UNIVERSITY, KURUKSHETRA**
(Established by the State Legislature Act XII of 1956)
**("A" Grade, NAAC Accredited)**

# एम० ए० संस्कृतम् (द्वितीयं वर्षम्)
# तृतीयचतुर्थसत्रात्मकम्
# M. A. Sanskrit (Final)
# Semesters : III & IV

## योजना, पाठ्यक्रमः, पाठचर्या च (2009–2010 शैक्षिकसत्रतः प्रवृत्तम्)
**SCHEME, SYLLABUS AND COURSES OF READING**
**(Effective from Academic Session : 2009-2010)**

एम०ए० (संस्कृतम्)-कक्ष्यायाः द्वितीयवर्षीयपाठ्यक्रमः 2009-2010 शैक्षिकसत्रतः सत्रद्वये –तृतीयसत्रे चतुर्थसत्रे च– विभक्तः वर्तते। तत्र प्रत्येकं सत्रे चत्वारो वैकल्पिकाः वर्गाः {वर्गः(क) वेदः, वर्गः(ख) व्याकरणम्, वर्गः(ग) भारतीयदर्शनम्, वर्गः(घ) संस्कृतसाहित्यम्} सन्ति येषां विद्यार्थी/परीक्षार्थी सत्रद्वयार्थं कमपि एकं वर्गं स्वीकर्तुं शक्नोति। प्रतिसत्रं प्रत्येकं वर्गे अध्ययनार्थं चत्वारि पत्राणि निर्धारितानि सन्ति। एतदतिरिक्तम् सर्वेषां वर्ग्याणां छात्राणां कृते द्वे अनिवार्यपत्रे {तृतीयसत्रे– एकादशपत्रम् : पालिभाषा साहित्यं च; चतुर्थसत्रे– षोडशपत्रम् : प्राकृतभाषा साहित्यं च} निर्धारिते स्तः। इत्थं च तृतीयसत्रे समुदितानि पञ्च (1+4=5) पत्राणि निर्धारितानि सन्ति। एवमेव चतुर्थसत्रे पञ्च (1+4=5) पत्राणि निर्धारितानि सन्ति। प्रत्येकं पत्रम् एकशताङ्कं (100 अङ्काः) वर्तते। एवञ्च एम०ए० (संस्कृतम्)-कक्ष्यायाः द्वितीयवर्षीयपाठ्यक्रमः सत्रद्वयात्मकः (तृतीयं सत्रम्, चतुर्थं सत्रम् च), दशपत्रात्मकः (5+5=10), एकसहस्राङ्कः (500+500=1000 अङ्काः) च विद्यते। परीक्षासमयः प्रतिपत्रं 3 होराः एव भविष्यति। संस्कृत-हिन्दी-आङ्ग्लभाषा-माध्यमानां केनापि एकेन माध्यमेन परीक्षार्थी प्रश्नपत्राणाम् उत्तरं लिखितुम् अर्हति। परन्तु प्रतिपत्रं निर्धारितघटकसम्बद्धप्रश्नस्य उत्तरं यथानिर्दिष्टं संस्कृतेन एव लेखनीयम् अन्यथा सर्वथा अङ्कहानिः भविष्यति।

The syllabus of M.A. Sanskrit (Final) class is bifurcated into two semesters, namely, Semester-III and Semester-IV, with effect from the Academic Session 2009-2010. There are four optional Groups (Group-A : Veda; Group-B : Grammar; Group-C : Indian Philosophy; Group-D : Sanskrit Literature) in each Semester out of which the student/examinee can opt any one Group for both the semesters. Four papers per Semester are prescribed for study in each Group. Besides, one compulsory paper is prescribed per Semester (In Semester-III: Paper-XI *Palibhasa Sahityam Cha*, and in Semester- IV: Paper-XVI *Prakritabhasa Sahityam Cha*) for the students/examinees of all the four Groups. Thus the total number of papers prescribed for Semester-III is five (1+4=5). In the same way the total number of papers prescribed for Semester-IV also is five (1+4=5). Each paper carries one hundred (100) marks. In this way the syllabus of M.A. (Sanskrit) Final Course consists of two semesters (III & IV), ten (5+5=10) papers and one thousand (500+500=1000) marks. The time for examination in each paper will be three (3) hours. The examinee/candidate can attempt his/her paper through any one medium out of Sanskrit, Hindi and English. But he/she will have to write the answer of the question(s), pertaining to the specific Unit as prescribed in the syllabus and as per instructions in the question paper through Sanskrit medium only otherwise no marks will be awarded to that particular answer.

**एम० ए० संस्कृतम् (द्वितीयवर्षम्)-कक्ष्यायाः विद्यार्थी/परीक्षार्थी तृतीयसत्रे 12–15 पत्रेभ्यः, चतुर्थसत्रे च 17–20 पत्रेभ्यः अधोलिखितेषु कमपि एकं वर्गं स्वीकर्तुं शक्नोति । तृतीयसत्रे एकादशपत्रम्, चतुर्थसत्रे च षोडशपत्रं सर्ववर्ग्याणां छात्राणां कृते अनिवार्यपत्रे स्तः :–**

**The student/examinee of M.A. Sanskrit (Final) Course can opt any one of the following groups for Paper Nos. 12-15 in the Third Semester and for Paper Nos. 17-20 in the Fourth Semester. Two papers, that is, Paper No. 11 in the Third Semester, and Paper No. 16 in the Fourth Semester are compulsory for the students/examinees of all the four groups.**

**एम० ए० संस्कृतम् (द्वितीयवर्षम्)-पाठ्यक्रमस्य तृतीयचतुर्थसत्रयोः वर्गाः/विकल्पाः**
**Groups/Options for Semesters - III & IV of M.A. Sanskrit (Final) Course**

वर्गः–क : वेदः (Group-A : Veda)
वर्गः–ख : व्याकरणम् (Group-B : Grammar)
वर्गः–ग : भारतीयदर्शनम् (Group-C : Indian Philosophy)
वर्गः–घ : संस्कृतसाहित्यम् (Group-D : Sanskrit Literature)

⌘

# एम० ए० संस्कृतम् (द्वितीयं वर्षम्)
## तृतीयं सत्रम् (2009–2010 शैक्षिकसत्रतः प्रवृत्तम्)
## M. A. Sanskrit (Final)
### Third Semester (w.e.f. 2009-2010)

| पाठ्यक्रमस्य रूपरेखा<br>**Outlines of the Syllabus** | | पूर्णाङ्काः<br>**Max. Marks** | समयः<br>**Time** |
|---|---|---|---|
| **एकादशं पत्रम्** :<br>**Paper- XI** : | पालिभाषा साहित्यं च<br>(सर्ववर्ग्याणां छात्राणां कृते अनिवार्यं पत्रम्)<br>Palibhasa Sahityam Cha<br>(Compulsory paper for students of all the four Groups) | 100 | 3 होराः (3 Hours) |
| **द्वादशं पत्रम्** :<br>**Paper- XII :** | | | |
| वर्गः–क (वेदः)<br>Group-A (Veda) | : ऋक्संहिता यजुस्संहिता च<br>: Riksamhita Yajussamhita Cha | 100 | 3 होराः (3 Hours) |
| वर्गः–ख (व्याकरणम्)<br>Group-B (Grammar) | : व्याकरणपरम्परा (1)<br>: Vyakaranaparampara (1) | 100 | 3 होराः (3 Hours) |
| वर्गः–ग (भारतीयदर्शनम्)<br>Group-C (Indian Philosophy) | : न्यायदर्शनम्<br>: Nyayadarshanam | 100 | 3 होराः (3 Hours) |
| वर्गः–घ (संस्कृतसाहित्यम्)<br>Group-D (Sanskrit Literature) | : नाट्यसाहित्यम्<br>: Natyasahityam | 100 | 3 होराः (3 Hours) |
| **त्रयोदशं पत्रम्** :<br>**Paper- XIII :** | | | |
| वर्गः–क (वेदः)<br>Group-A (Veda) | : ब्राह्मणसाहित्यम्<br>: Brahmanasahityam | 100 | 3 होराः (3 Hours) |
| वर्गः–ख (व्याकरणम्)<br>Group-B (Grammar) | : व्याकरणदर्शनम् (1)<br>: Vyakaranadarshanam (1) | 100 | 3 होराः (3 Hours) |

वर्गः–ग (भारतीयदर्शनम्) : पूर्वमीमांसादर्शनम् 100 3 होराः (3 Hours)
Group-C (Indian Philosophy) : Purvamimamsadarshanam

वर्गः–घ (संस्कृतसाहित्यम्) : काव्यशास्त्रम् (1) 100 3 होराः (3 Hours)
Group-D (Sanskrit Literature) : Kavyashastram (1)

**चतुर्दशं पत्रम् :**
**Paper- XIV :**

वर्गः–क (वेदः) : कल्पसाहित्यम् 100 3 होराः (3 Hours)
Group-A (Veda) : Kalpasahityam

वर्गः–ख (व्याकरणम्) : व्याकरणप्रक्रिया (1) 100 3 होराः (3 Hours)
Group-B (Grammar) : Vyakaranaprakriya (1)

वर्गः–ग (भारतीयदर्शनम्) : चार्वाक-जैनदर्शने 100 3 होराः (3 Hours)
Group-C (Indian Philosophy) : Charvaka-Jainadarshane

वर्गः–घ (संस्कृतसाहित्यम्) : काव्यं काव्यशास्त्रस्य च इतिहासः 100 3 होराः (3 Hours)
Group-D (Sanskrit Literature) : Kavyam Kavyashastrasya Cha Itihasah

**पञ्चदशं पत्रम् :**
**Paper- XV :**

वर्गः–क (वेदः) : ऋक्प्रातिशाख्यं छन्दांसि च 100 3 होराः (3 Hours)
Group-A (Veda) : Rikpratishakhyam Chhandamsi Cha

वर्गः–ख (व्याकरणम्) : व्याकरणप्रक्रिया (2) 100 3 होराः (3 Hours)
Group-B (Grammar) : Vyakaranaprakriya (2)

वर्गः–ग (भारतीयदर्शनम्) : बौद्धदर्शनम् 100 3 होराः (3 Hours)
Group-C (Indian Philosophy) : Bauddhadarshanam

वर्गः–घ (संस्कृतसाहित्यम्) : ऐतिहासिककाव्यं खण्डकाव्यं च 100 3 होराः (3 Hours)
Group-D (Sanskrit Literature) : Aitihasikakavyam Khandakavyam Cha

★★★

# एम० ए० संस्कृतम् (द्वितीयं वर्षम्)
## चतुर्थं सत्रम् (2009–2010 शैक्षिकसत्रतः प्रवृत्तम्)
# M. A. Sanskrit (Final)
## Fourth Semester (w.e.f. 2009-2010)

| पाठ्यक्रमस्य रूपरेखा | पूर्णाङ्काः | समयः |
|---|---|---|
| **Outlines of the Syllabus** | **Max. Marks** | **Time** |

**षोडशं पत्रम्** : प्राकृतभाषा साहित्यं च 100 3 होराः (3 Hours)
(सर्ववर्ग्याणां छात्राणां कृते अनिवार्यं पत्रम्)
**Paper- XVI** : Prakritabhasa Sahityam Cha
(Compulsory paper for students of all the four Groups)

**सप्तदशं पत्रम् :**
**Paper- XVII :**

वर्गः–क (वेदः) : अथर्वसंहिता सामसंहिता च 100 3 होराः (3 Hours)
Group-A (Veda) : Atharvasamhita Samasamhita Cha

| | | | |
|---|---|---|---|
| वर्गः–ख (व्याकरणम्)<br>Group-B (Grammar) | : व्याकरणपरम्परा (2)<br>: Vyakaranaparampara (2) | 100 | 3 होराः (3 Hours) |
| वर्गः–ग (भारतीयदर्शनम्)<br>Group-C (Indian Philosophy) | : योगदर्शनम्<br>: Yogadarshanam | 100 | 3 होराः (3 Hours) |
| वर्गः–घ (संस्कृतसाहित्यम्)<br>Group-D (Sanskrit Literature) | : नाट्यशास्त्रम्<br>: Natyashastram | 100 | 3 होराः (3 Hours) |

**अष्टादशं पत्रम् :**
**Paper- XVIII :**

| | | | |
|---|---|---|---|
| वर्गः–क (वेदः)<br>Group-A (Veda) | : आरण्यकोपनिषत्साहित्यम्<br>: Aranyakopanisatsahityam | 100 | 3 होराः (3 Hours) |
| वर्गः–ख (व्याकरणम्)<br>Group-B (Grammar) | : व्याकरणदर्शनम् (2)<br>: Vyakaranadarshanam (2) | 100 | 3 होराः (3 Hours) |
| वर्गः–ग (भारतीयदर्शनम्)<br>Group-C (Indian Philosophy) | : अद्वैतवेदान्तदर्शनम्<br>: Advaitavedantadarshanam | 100 | 3 होराः (3 Hours) |
| वर्गः–घ (संस्कृतसाहित्यम्)<br>Group-D (Sanskrit Literature) | : काव्यशास्त्रम् (2)<br>: Kavyashastram (2) | 100 | 3 होराः (3 Hours) |

**एकोनविंशं पत्रम् :**
**Paper- XIX :**

| | | | |
|---|---|---|---|
| वर्गः–क (वेदः)<br>Group-A (Veda) | : वेदव्याख्यापद्धतयः वेदभाष्यकाराश्च<br>: Vedavyakhyapaddhatayah Vedabhasyakarashcha | 100 | 3 होराः (3 Hours) |
| वर्गः–ख (व्याकरणम्)<br>Group-B (Grammar) | : व्याकरणप्रक्रिया (3)<br>: Vyakaranaprakriya (3) | 100 | 3 होराः (3 Hours) |
| वर्गः–ग (भारतीयदर्शनम्)<br>Group-C (Indian Philosophy) | : अद्वैतशैवागमः (काश्मीरशैवदर्शनम्) पूर्णाद्वैतदर्शनञ्च<br>: Advaitashaivagamah (Kashmirashaivadarshanam) Purnadvaitadarshananca | 100 | 3 होराः (3 Hours) |
| वर्गः–घ (संस्कृतसाहित्यम्)<br>Group-D (Sanskrit Literature) | : चम्पूकाव्यं काव्यादर्शश्च<br>: Campukavyam Kavyadarshashca | 100 | 3 होराः (3 Hours) |

**विंशं पत्रम् :**
**Paper- XX :**

| | | | |
|---|---|---|---|
| वर्गः–क (वेदः)<br>Group-A (Veda) | : वैदिकव्याकरणम्<br>: Vaidikavyakaranam | 100 | 3 होराः (3 Hours) |
| वर्गः–ख (व्याकरणम्)<br>Group-B (Grammar) | : व्याकरणप्रक्रिया (4)<br>: Vyakaranaprakriya (4) | 100 | 3 होराः (3 Hours) |
| वर्गः–ग (भारतीयदर्शनम्)<br>Group-C (Indian Philosophy) | : दार्शनिकसिद्धान्ताः आधुनिकविज्ञानञ्च<br>: Darshanikasiddhantah Adhunikavijnananca | 100 | 3 होराः (3 Hours) |
| वर्गः–घ (संस्कृतसाहित्यम्)<br>Group-D (Sanskrit Literature) | : आधुनिककाव्यं गीतिकाव्यं च<br>: Adhunikakavyam Gitikavyam Cha | 100 | 3 होराः (3 Hours) |

# एम० ए० संस्कृतम् (द्वितीयं वर्षम्)
## तृतीयं सत्रम्
(2009-2010 शैक्षिकसत्रतः प्रवृत्तम्)

# M. A. Sanskrit (Final)
## Third Semester
**(Effective from Academic Session: 2009-2010)**

## लिखितपत्राणां विस्तृतः पाठ्यक्रमः
**Detailed Syllabus for written papers**

**एकादशं पत्रम् : पालिभाषा साहित्यं च** **पूर्णाङ्काः 100**
**Paper- XI : Palibhasa Sahityam Cha** **समयः 3 होराः (3 Hours)**

घटकम्-1 : पालिसाहित्यम् : पालिसंग्रहः, अधोनिर्दिष्टाः एव पाठाः -
1-6, 9,11-13,17,18 - सप्रसङ्गं संस्कृतमाध्यमेन गद्यांशव्याख्या **20 अंकाः**

घटकम्-2 : पालिसाहित्यम् : पालिसंग्रहः, अधोनिर्दिष्टाः एव पाठाः -
21-30, 32, 34-36 - सप्रसङ्गं श्लोकव्याख्या **20 अंकाः**

घटकम्-3 : पालिसाहित्यस्य इतिहासः **20 अंकाः**
पालिभाषायाः उद्भवः विकासश्च, भारतीय-आर्यभाषाणां विकासक्रमे पालिभाषायाः अवदानम्, भारतीयसंस्कृतेः इतिहासे पालिभाषायाः पालिसाहित्यस्य च अवदानम्, भारतीय-इतिहासस्य निर्माणे पालिभाषाध्ययनस्य पालिसाहित्याध्ययनस्य च महत्त्वम्, पालि-प्राकृत-वैदिकसंस्कृतलौकिकसंस्कृतभाषाणां भाषावैज्ञानिकं साम्यम्/वैषम्यम्।

घटकम्-4 : पालिव्याकरणम् **20 अंकाः**
(क) सन्धिः, समासः, कारकम् (10 अंकाः)
(ख) संज्ञारूपाणि, धातुरूपाणि (10 अंकाः)
(i) संज्ञारूपाणि - बुद्ध, मुनि, अग्गि, भिक्खु, राया, अत्ता अथवा अप्पा, पिता, कञ्या, इत्थी, माता ।
(ii) धातुरूपाणि - भू, गम, पठ, ठा, दिस्स, कर, दा, पुच्छ, कथ, सक्ख (केवलं लट्-लङ्-लृट्-लोट्-विधिलिङ्-लकारेषु)

घटकम्-5 : उपरितनघटकचतुष्टयगतपाठ्यक्रममाश्रित्य चत्वारः विकल्परहिताः संक्षिप्तोत्तराः प्रश्नाः । **20 अंकाः**

**टिप्पणी :**

(क) प्रश्नानां समाधानं संस्कृत/हिन्दी/आङ्ग्लभाषामाध्यमानां केनापि एकेन माध्यमेन कर्तुं शक्यते, परन्तु प्रथमघटकस्य प्रश्नाः संस्कृतमाध्यमेन एव समाधेयाः अन्यथा सर्वथा अङ्कहानिः भविष्यति ।

(ख) चतुर्थघटकं यावत् व्याख्या-व्याकरणात्मकेषु प्रश्नेषु 50% अंशः, इतिहास-निबन्धात्मक-प्रश्नेषु च 100% अंशः वैकल्पिकः भवेत्, परन्तु पञ्चमघटकस्य संक्षिप्तोत्तरप्रश्नेषु न कोऽपि विकल्पो भविष्यति

**प्रश्नपत्रनिर्माणविधिः**

1. प्रश्नपत्रस्य निर्माणं संस्कृतमाध्ययेन भवेत् ।
2. प्रश्नपत्रे पञ्च (5) अनिवार्याः प्रश्नाः भविष्यन्ति ।
3. प्रश्नानाम् अङ्कानां च विभाजनम् अधोलिखितरूपेण भविष्यति -

I. प्रथमघटकाश्रितः प्रश्नः - सप्रसङ्गं गद्यांशद्वयं संस्कृतमाध्यमेन व्याख्यातुं यथानिर्दिष्टग्रन्थात् गद्यांशत्रयं प्रदास्यते । (2x10=20 अंकाः)

II. द्वितीयघटकाश्रितः प्रश्नः - सप्रसङ्गं श्लोकद्वयं व्याख्यातुं यथानिर्दिष्टग्रन्थात् श्लोकत्रयं प्रदास्यते । (2x10=20 अंकाः)

III. तृतीयघटकाश्रितः प्रश्नः- अस्मिन् घटके पालिसाहित्यस्य इतिहासमाश्रितः एकः निबन्धः लेखनीयः । तदर्थं निबन्धात्मकप्रश्नद्वयं प्रदास्यते । (20 अंकाः)

IV. चतुर्थघटकाश्रितः प्रश्नः - पालिव्याकरणे सन्धि-समास-कारकेभ्यः 10 अंकात्मकाः प्रश्नाः, संज्ञा-धातुरूपेभ्यश्च 10 अंकात्मकाः प्रश्नाः प्रदास्यन्ते। (10x2=20 अंकाः)

V. पञ्चघटकाश्रितः प्रश्नः - पञ्चमघटकोक्तानुसारेण चत्वारः विकल्परहिताः संक्षिप्तोत्तराः प्रश्नाः प्रदास्यन्ते । (4x5=20 अंकाः)

**अनुशंसितग्रन्था:**


1. पालि-संग्रह, सम्पा॰ डॉ॰ पी॰ वी॰ बापट, साहित्य अकादमी, न्यू दिल्ली
2. पालिप्पदीपिका, वीरेन्द्रकुमार अलंकार, वागाम्भृणी, पिंजौर (पंचकूला)
3. पालिमहाव्याकरण, भिक्षु जगदीश कश्यप, मोतीलाल बनारसीदास, दिल्ली
4. कच्चायनव्याकरण, सम्पा॰ एस॰ एन॰ तिवारी, तारा बुक एजेन्सी, कमच्छा, वाराणसी, 1989
5. बालावतार (पालिव्याकरण), सम्पा॰ द्वारिकादास शास्त्री, वाराणसी
6. पालि साहित्य का इतिहास, भरतसिंह उपाध्याय, हिन्दी साहित्य सम्मेलन, प्रयाग
7. पालिसाहित्य का इतिहास, कोमलचन्द्र जैन, वाराणसी, 1989
8. पालिसाहित्य का इहिास, पं॰ राहुल सांकृत्यायन
9. हिस्ट्री ऑफ पालि लिटरेचर (वॉल्यूम-2), एम॰ विण्टरनित्स


★★★

## वर्ग: 'क' वेद: [Group - A : Veda]

**द्वादशं पत्रम् : ऋक्संहिता यजुस्संहिता च** — **पूर्णाङ्का: 100**

**Paper- XII : Riksamhita Yajussamhita Cha** — **समय: 3 होरा: (3 Hours)**

घटकम्-1 : निम्नसूक्तानां पारम्परिक-पाश्चात्त्यभाष्यकारानुसारेण गहनमध्ययनम् (संस्कृतमाध्यमेन)-
ऋग्वेद: - अग्नि: (1.19), सूर्य: (1.115), ब्रह्मणस्पति: (2.23),
मित्र: (3.59), उषा: (3.61), पर्जन्य: (5.83) । **20 अंका:**

घटकम्-2 : निम्नसूक्तानां पारम्परिक-पाश्चात्त्यभाष्यकारानुसारेण गहनमध्ययनम् -
ऋग्वेद:- पूषन् (6.53), वास्तोष्पति: (7.54), सरस्वती (7.95),
मण्डूक: (7.103), अक्ष: (10.34), ज्ञानम् (10.71) । **20 अंका:**

घटकम्-3 : निम्नलिखितस्याध्यायद्वयस्य उव्वटमहीधरभाष्यसहितं गहनमध्ययनम -
यजुर्वेद: (माध्यन्दिन- वाजसनेयि), अध्याय: 31-32 (सम्पूर्णम्) । **20 अंका:**

घटकम्-4 : निम्नलिखितस्याध्यायस्य उव्वटमहीधरभाष्यसहितं गहनमध्ययनम् -
यजुर्वेद: (माध्यन्दिन-वाजसनेयि), अध्याय: 33 (1-50 मन्त्रपर्यन्तम्) । **20 अंका:**

घटकम्-5 : उपरितनघटकचतुष्टयगतपाठ्यक्रममाश्रित्य चत्वार: विकल्परहिता:
संक्षिप्तोत्तरा: प्रश्ना: । **20 अंका:**

**टिप्पणी :-**

(क) प्रश्नानां समाधानं संस्कृत/हिन्दी/आङ्ग्लभाषामाध्यमानां केनापि एकेन माध्यमेन कर्तुं शक्यते, परन्तु प्रथमघटकस्य प्रश्ना: संस्कृतमाध्यमेन एव समाधेया:, अन्यथा सर्वथा अङ्कहानि: भविष्यति।

(ख) चतुर्थघटकं यावद् व्याख्यात्मकप्रश्नेषु 50% अंश:, आलोचनात्मकप्रश्नेषु च 100% अंश: वैकल्पिक: भवेत्, परन्तु पञ्चमघटकस्य संक्षिप्तोत्तरप्रश्नेषु न कोऽपि विकल्पो भविष्यति ।

**प्रश्नपत्रनिर्माणविधि:**

1. प्रश्नपत्रस्य निर्माणं संस्कृतमाध्यमेन भवेत् ।
2. प्रश्नपत्रे षट् (6) अनिवार्या: प्रश्ना: भविष्यन्ति ।
3. प्रश्नानाम् अङ्कानां च विभाजनम् अधोलिखितरूपेण भविष्यति-

I. प्रथमघटकाश्रित: प्रश्न: - पारम्परिक-पाश्चात्त्यभाष्यकारानुसारेण मन्त्रद्वयं संस्कृतमाध्यमेन व्याख्यातुं यथानिर्दिष्टसूक्तेभ्य: मन्त्रत्रयं प्रदास्यते । (2x10=20 अंका:)

II. द्वितीयघटकाश्रित: प्रश्न: - पारम्परिक-पाश्चात्त्यभाष्यकारानुसारेण मन्त्रद्वयं व्याख्यातुं यथानिर्दिष्टसूक्तेभ्य: मन्त्रत्रयं प्रदास्यते। (2x7=14 अंका:)

III. प्रथमद्वितीयघटकयो: निर्दिष्टसूक्तसम्बद्धं वैदिकदेवविषयकम् एकम् आलोचनात्मकं प्रश्नं समाधातुं प्रश्नद्वयं प्रदास्यते । (6 अंका:)

IV. तृतीयघटकाश्रित: प्रश्न: - उव्वटमहीधरभाष्यानुसारेण मन्त्रद्वयं व्याख्यातुं यथानिर्दिष्टाध्यायद्वयात् मन्त्रत्रयं प्रदास्यते । (2x10=20 अंका:)

V. चतुर्थघटकाश्रित: प्रश्न: - उव्वटमहीधरभाष्यानुसारेण मन्त्रद्वयस्य विशदव्याख्यायै यथानिर्दिष्टाध्यायात् मन्त्रत्रयं प्रदास्यते । (2x10=20 अंका:)

VI. पञ्चमघटकाश्रित: प्रश्न: - पञ्चमघटकोक्तानुसारेण विकल्परहिता: चत्वार: संक्षिप्तोत्तरा: प्रश्ना: प्रदास्यन्ते । (4x5=20 अंका:)

**अनुशंसितग्रन्थाः**

1. सायणकृतम् ऋग्वेदभाष्यम् ।
2. ऋग्वेद का सुबोध भाष्य, पं० श्रीपाद दामोदर सातवलेकर, पारडी ।
3. वैदिक व्याख्याविवेचन, डॉ० राम गोपाल, नैशनल पब्लिशिंग हाउस, नई दिल्ली ।
4. Vedic Reader for Students, A.A. Macdonell.
5. Hymns from the Rigveda, Peterson, B.O.R.I., Pune, 1938.
6. Hymns of the Rigveda, Ralph T.M. Griffith, Chowkhamba, Varanasi, 1963.
7. उव्वटमहीधरकृत शुक्लयजुर्वेदभाष्य, मोतीलाल बनारसीदास, दिल्ली ।
8. यजुर्वेदभाष्य, स्वामी दयानन्दसरस्वती, सम्पा० ब्रह्मदत्त जिज्ञासु, रामलाल कपूर ट्रस्ट, सोनीपत (हरियाणा)
9. वेद-व्याख्या की दिशाएँ, डॉ० व्रजबिहारी चौबे, कात्यायन वैदिक साहित्य प्रकाशन, होशियारपुर, पंजाब, 2006
10. वेदभाष्यकारों की वेदार्थ प्रक्रियाएँ, डॉ० रामनाथ वेदालंकार ।
11. वैदिक देवशास्त्र, अनुवादक सूर्यकान्त ।
12. वैदिक देवता : उद्भव और विकास (भाग 1-2), गयाचरण त्रिपाठी, भारतीय विद्या प्रकाशन, दिल्ली ।

★★★

**त्रयोदशं पत्रम् : ब्राह्मणसाहित्यम्** — **पूर्णाङ्काः 100**
**Paper- XIII : Brahmanasahityam** — **समयः 3 होराः (3 Hours)**

घटकम्-1 : निर्दिष्टग्रन्थस्य पारम्परिकभाष्यानुसारेण अध्ययनम् (संस्कृतमाध्यमेन)-
ऐतरेयब्राह्मणम्, अध्यायः 34 — **20 अंकाः**
घटकम्-2 : निर्दिष्टग्रन्थस्य पारम्परिकभाष्यानुसारेण अध्ययनम् -
ऐतरेय-ब्राह्मणम्, अध्यायः 35 — **20 अंकाः**
घटकम्-3 : निर्दिष्टग्रन्थस्य पारम्परिकभाष्यानुसारेण अध्ययनम् -
शतपथ-ब्राह्मणम्, काण्डः 5 (चरकसौत्रामणी) — **20 अंकाः**
घटकम्-4 : निर्दिष्टग्रन्थस्य पारम्परिकभाष्यानुसारेण अध्ययनम् -
शतपथ-ब्राह्मणम्, काण्डः 1, अध्यायः 8, ब्राह्मणम् 1-2 (मनु-मत्स्याख्यानम्) — **20 अंकाः**
घटकम्-5 : उपरितनघटकचतुष्टयगतपाठ्यक्रममाश्रित्य चत्वारः विकल्परहिताः
संक्षिप्तोत्तराः प्रश्नाः । — **20 अंकाः**

**टिप्पणी :-**

(क) प्रश्नानां समाधानं संस्कृत/हिन्दी/आङ्गलभाषामाध्यमानां केनापि एकेन माध्यमेन कर्तुं शक्यते, परन्तु प्रथमघटकस्य प्रश्नाः संस्कृतमाध्यमेन एव समाधेयाः अन्यथा सर्वथा अङ्कहानिः भविष्यति।

(ख) चतुर्थघटकं यावद् व्याख्यात्मकप्रश्नेषु 50% अंशः, आलोचनात्मकप्रश्नेषु च 100% अंशः वैकल्पिकः भवेत्, परन्तु पञ्चमघटकस्य संक्षिप्तोत्तरप्रश्नेषु न कोऽपि विकल्पो भविष्यति।

**प्रश्नपत्रनिर्माणविधिः**

1. प्रश्नपत्रस्य निर्माणं संस्कृतेन भवेत् ।
2. प्रश्नपत्रे सप्त (7) अनिवार्याः प्रश्नाः भविष्यन्ति ।
3. प्रश्नानाम् अङ्कानां च विभाजनम् अधोलिखितरूपेण भविष्यति -

I. प्रथमघटकाश्रितः प्रश्नः - पारम्परिक्या रीत्या प्रकरणद्वयं संस्कृतमाध्यमेन व्याख्यातुं निर्दिष्टाध्यायात् प्रकरणत्रयं प्रदास्यते । (2x10=20 अंकाः)

II. द्वितीयघटकाश्रितं प्रश्नद्वयम् - प्रथमे प्रश्ने पारम्परिक्या रीत्या प्रकरणद्वयं व्याख्यातुं निर्दिष्टाध्यायात् प्रकरणत्रयं प्रदास्यते । (2x7=14 अंकाः)
द्वितीये प्रश्ने निर्दिष्टाध्यायगतविषयसम्बद्धम् एकम् आलोचनात्मकं प्रश्नं समाधातुं प्रश्नद्वयं प्रदास्यते । (1x6=6 अंकाः)

III. तृतीयघटकाश्रितः प्रश्नः - पारम्परिक्या रीत्या प्रकरणद्वयं विशदेन व्याख्यातुं निर्दिष्टांशात् प्रकरणत्रयं प्रदास्यते । (2x10=20 अंकाः)

IV. चतुर्थघटकाश्रितं प्रश्नद्वयम् - प्रथमे प्रश्ने पारम्परिक्या रीत्या प्रकरणद्वयं व्याख्यातुं निर्दिष्टांशात् प्रकरणत्रयं प्रदास्यते । (2x7=14 अंकाः)
द्वितीये प्रश्ने यथानिर्दिष्टपाठ्यांशविषयसम्बद्धम् एकम् आलोचनात्मकं प्रश्नं समाधातुं प्रश्नद्वयं प्रदास्यते । (1x6=6 अंकाः)

V. पञ्चमघटकाश्रितः प्रश्नः - पञ्चमघटकोक्तानुसारेण चत्वारः विकल्परहिताः संक्षिप्तोत्तराः प्रश्नाः प्रदास्यन्ते। (4x5=20 अंकाः)

**अनुशंसितग्रन्था:**


1. ऐतरेय-ब्राह्मणम् (सायणभाष्य एवं सरल हिन्दी व्याख्या), सम्पा० डॉ० सुधाकर मालवीय, तारा प्रिंटिंग वर्क्स, वाराणसी ।
2. Martin Haug, The Aitareya Brahmana of the Rigveda, Bhartiya Publishing House, 1976.
3. ऐतरेयालोचनम्, सत्यव्रत सामश्रमी ।
4. ए० वी० कीथ, द ऋग्वैदिक ब्राह्मणाज् ।
5. शतपथ-ब्राह्मण, सम्पा० गंगाप्रसाद उपाध्याय (भाग 1 तथा 3) ।
6. शतपथ-ब्राह्मण (सायणभाष्य), नाग प्रकाशन, दिल्ली ।
7. शतपथ-ब्राह्मणम्, Eng. Tr. जे० इगलिंग (भाग 1-5) ।
8. शतपथ-ब्राह्मण : एक सांस्कृतिक अध्ययन, उर्मिला देवी शर्मा, मेहरचन्द लछमनदास पब्लिकेशन्स, नई दिल्ली ।


★★★

## चतुर्दशं पत्रम् : कल्पसाहित्यम् — पूर्णाङ्का: 100

**Paper- XIV : Kalpasahityam** — **समय: 3 होरा:** **(3 Hours)**

घटकम्-1 : निम्नलिखितश्रौतसूत्रस्य कर्कभाष्यानुसारेण विशदम् अध्ययनम् (संस्कृतमाध्यमेन)-
कात्यायनश्रौतसूत्रम् - अध्याय: 2, कण्डिका 1-4, (दर्शपौर्णमास:) **20 अंका:**

घटकम्-2 : निम्नलिखितश्रौतसूत्रस्य कर्कभाष्यानुसारेण विशदम् अध्ययनम् -
कात्यायनश्रौतसूत्रम्, अध्याय: 2, कण्डिका 5-8 (दर्शपौर्णमास:) **20 अंका:**

घटकम्-3 : निम्नगृह्यसूत्रस्य हरिहर-गदाधर-कर्क-भाष्यानुसारेण अध्ययनम् -
पारस्करगृह्यसूत्रम्, प्रथम: काण्ड: **20 अंका:**

घटकम्-4 : निम्नशुल्बसूत्रस्य विशदम् अध्ययनम् -
कात्यायनशुल्बसूत्रम्, प्रथम: अध्याय: **20 अंका:**

घटकम्-5 : उपरितनघटकचतुष्टयगतपाठ्यक्रममाश्रित्य चत्वार: विकल्परहिता: संक्षिप्तोत्तरा: प्रश्ना: । **20 अंका:**

**टिप्पणी :-**

(क) प्रश्नानां समाधानं संस्कृत/हिन्दी/आङ्ग्लभाषामाध्यमानां केनापि एकेन माध्यमेन कर्तुं शक्यते, परन्तु प्रथमघटकस्य प्रश्ना: संस्कृतमाध्यमेन एव समाधेया:, अन्यथा सर्वथा अङ्कहानि: भविष्यति।

(ख) चतुर्थघटकं यावद् व्याख्यात्मकप्रश्नेषु 50% अंश:, आलोचनात्मकप्रश्नेषु च 100% अंश: वैकल्पिक: भवेत्। परन्तु पञ्चमघटकस्य संक्षिप्तोत्तरप्रश्नेषु न कोऽपि विकल्पो भविष्यति।

**प्रश्नपत्रनिर्माणविधि:**

1. प्रश्नपत्रस्य निर्माणं संस्कृतमाध्यमेन भवेत् ।
2. प्रश्नपत्रे षट् (6) अनिवार्या: प्रश्ना: भविष्यन्ति ।
3. प्रश्नानाम् अङ्कानां च विभाजनम् अधोलिखितरूपेण भविष्यति -

I. प्रथमघटकाश्रित: प्रश्न: - कर्कभाष्यानुसारेण सूत्रचतुष्टयं संस्कृतमाध्यमेन व्याख्यातुं यथानिर्दिष्टाध्यायात् षट् सूत्राणि प्रदास्यन्ते । (4x5=20 अंका:)

II. द्वितीयघटकाश्रित: प्रश्न: - कर्कभाष्यानुसारेण सूत्रचतुष्टयं व्याख्यातुं यथानिर्दिष्टाध्यायात् षट् सूत्राणि प्रदास्यन्ते। (4x5=20 अंका:)

III. तृतीयघटकाश्रितं प्रश्नद्वयम् - प्रथमे प्रश्ने निर्दिष्टभाष्यकारानुसारेण सूत्रचतुष्टयं व्याख्यातुं यथानिर्दिष्टकाण्डात् षट् सूत्राणि प्रदास्यन्ते । (4x4=16 अंका:)
द्वितीये प्रश्ने यथानिर्दिष्टकाण्डगतं संस्कारमेकमाश्रित्य टिप्पणीं लिखितुं संस्कारद्वयं प्रदास्यते। (1x4=4 अंका:)

IV. चतुर्थघटकाश्रित: प्रश्न: - सूत्रद्वयं व्याख्यातुं यथानिर्दिष्टाध्यायात् सूत्रत्रयं प्रदास्यते । (2x10=20 अंका:)

अथवा

प्रतिपाद्यवस्तुविषयकम् एकं विवरणात्मकं प्रश्नं समाधातुं प्रश्नद्वयं प्रदास्यते। (1x20=20 अंका:)

V. पञ्चमघटकाश्रित: प्रश्न: - पञ्चमघटकोक्तानुसारेण चत्वार: विकल्परहिता: संक्षिप्तोत्तरा: प्रश्ना: प्रदास्यन्ते । (4x5=20 अंका:)

**अनुशंसितग्रन्था:**


1. कात्यायन-श्रौतसूत्रम्, विद्याधरशर्मा-कृत सरलावृत्ति, अच्युत ग्रन्थमाला, वाराणसी ।
2. कात्यायनश्रौतसूत्रम् (भाग 1-2), नित्यानन्द पन्त और गोपालशास्त्री नेने, चौखम्बा संस्कृत सीरीज, वाराणसी ।

3. कात्यायन-श्रौतसूत्रम्, कर्कभाष्य, डॉ० ए० बेवर, चौखम्बा संस्कृत सीरीज, वाराणसी, 1972
4. कात्यायनश्रौतसूत्रम् (कर्कभाष्यसहितम्), प्रथम भाग, श्री लाल बहादुर शास्त्री केन्द्रीय संस्कृत विद्यापीठ, दिल्ली, 1982-85
5. पारस्करगृह्यसूत्र, अनुवादक डॉ० सुधाकर मालवीय, तारा प्रिंटिंग वर्क्स, वाराणसी ।
6. पारस्करगृह्यसूत्र, खेमराज श्रीकृष्णदास, बाम्बे ।
7. पारस्करगृह्यसूत्र (हरिहरगदाधर-भाष्य), सम्पा० डॉ० जगदीशचन्द्र, चौखम्बा संस्कृत सीरीज, वाराणसी ।
8. पारस्करगृह्यसूत्र (हरिहरभाष्यसहित), डॉ० हरिदत्त शास्त्री, भारतीय विद्या प्रकाशन, दिल्ली ।
9. कातीयशुल्बसूत्र, विद्याधरगौड-कृत सरलावृत्ति, अच्युत ग्रन्थमाला, वाराणसी।
10. कातीयशुल्बसूत्र, कर्क-महीधर-वृत्ति-सहित, चौखम्बा, वाराणसी ।
11. कात्यायनशुल्बसूत्रम् (सोपपत्तिकं पर्यालोचनम्), डॉ० रमेशचन्द दाश शर्मा, नाग प्रकाशन, दिल्ली, 1994
12. पारस्करगृह्यसूत्र, व्याख्याकार, डॉ० वेदपाल, सत्यार्थप्रकाशन न्यास, कुरुक्षेत्र, 2008


★★★

**पञ्चदशं पत्रम् : ऋक्प्रातिशाख्यं छन्दांसि च** — **पूर्णाङ्काः 100**

**Paper- XV : Rikpratishakhyam Chhandamsi Cha** — **समयः 3 होराः (3 Hours)**

| | | |
|---|---|---|
| घटकम्-1 | : सूत्राणां सोदाहरणं विशदव्याख्यानम् (संस्कृतमाध्यमेन)- शौनकः, ऋक्प्रातिशाख्यम् - पटलम् 1 | **20 अंकाः** |
| घटकम्-2 | : सूत्राणां सोदाहरणं विशदव्याख्यानम्- शौनकः, ऋक्प्रातिशाख्यम् - पटलम् 2-3 | **20 अंकाः** |
| घटकम्-3 | : सूत्राणां सोदाहरणं विशदं व्याख्यानम् - शौनकः, ऋक्प्रातिशाख्यम् - पटलम् 4 | **20 अंकाः** |
| घटकम्-4 | : वैदिकछन्दसां ज्ञानम् - प्रमुखवैदिकच्छन्दांसि (ऋक्प्रातिशाख्यानुसारेण)। | **20 अंकाः** |
| घटकम्-5 | : उपरितन-घटकचतुष्टयगतपाठ्यक्रममाश्रित्य चत्वारः विकल्परहिताः संक्षिप्तोत्तराः प्रश्नाः । | **20 अंकाः** |

**टिप्पणी :**

(क) प्रश्नानां समाधानं संस्कृत/हिन्दी/आङ्ग्लभाषामाध्यमानां केनापि एकेन माध्यमेन कर्तुं शक्यते, परन्तु प्रथमघटकस्य प्रश्नाः संस्कृतमाध्यमेन एव समाधेयाः, अन्यथा सर्वथा अङ्कहानिः भविष्यति।

(ख) चतुर्थघटकं यावद् व्याख्यात्मकप्रश्नेषु 50% अंशः, आलोचनात्मकप्रश्नेषु च 100% अंशः वैकल्पिको भवेत्। परन्तु पञ्चमघटकस्य संक्षिप्तोत्तरप्रश्नेषु न कोऽपि विकल्पो भविष्यति।

**प्रश्नपत्रनिर्माणविधिः**

1. प्रश्नपत्रस्य निर्माणं संस्कृतमाध्यमेन भवेत् ।
2. प्रश्नपत्रे पञ्च (5) अनिवार्याः प्रश्नाः भविष्यन्ति ।
3. प्रश्नानाम् अङ्कानां च विभाजनम् अधोलिखितरूपेण भविष्यति-

I. प्रथमघटकात् - सोदाहरणं संस्कृतमाध्यमेन व्याख्यानार्थं पञ्चानां सूत्राणां यथानिर्दिष्टपटलात् सूत्राष्टकं दास्यते । (5x4=20 अंकाः)

II. द्वितीयघटकात् - पञ्चानां सूत्राणां सोदाहरणं व्याख्यानार्थं यथानिर्दिष्टपटलाभ्यां सूत्राष्टकं प्रदास्यते । (5x4=20 अंकाः)

III. तृतीयघटकात् - पञ्चानां सूत्राणां सोदाहरणं व्याख्यायै यथानिर्दिष्टपटलात् सूत्राष्टकं प्रदास्यते । (5x4=20 अंकाः)

IV. चतुर्थघटकात् - द्वयोश्छन्दसोः सलक्षणं सोदाहरणं व्याख्यानाय छन्दश्चतुष्टयं प्रदास्यते । (2x10=20 अंकाः)

VI. पञ्चमघटकोक्तानुसारेण चत्वारः विकल्परहिताः संक्षिप्तोत्तराः प्रश्नाः प्रदास्यन्ते। (4x5=20 अंकाः)

**अनुशंसितग्रन्थाः**


1. ऋक्प्रातिशाख्यम्, सम्पा० तथा अनुवादक मंगलदेव शास्त्री, चौखम्बा, वाराणसी ।
2. ऋक्प्रातिशाख्यम्, (उव्वट-भाष्यसहितम्) सम्पा० तथा अनु० डॉ० वीरेन्द्रकुमार वर्मा, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, 1992
3. ऋग्वेदप्रातिशाख्यम् - डॉ० ब्रजबिहारी चौबे (पटल 1-4), भारतीय विद्या प्रकाशन, दिल्ली ।
4. ऋग्वेदप्रातिशाख्य : एक परिशीलन, डॉ० वीरेन्द्र कुमार वर्मा, काशी हिन्दू विश्वविद्यालय, वाराणसी, 1972
5. वैदिक छन्दोमीमांसा, पं० युधिष्ठिर मीमांसक, रामलाल कपूर ट्रस्ट, रेवली, सोनीपत ।
6. छन्दःशास्त्रम् (पिंगलकृत), श्री हलायुधभट्टविरचित मृतसंजीवनी व्याख्या एवं वृत्तिसहित, चौखम्बा ओरियण्टालिया, वाराणसी, 1986


★★★

# वर्गः 'ख' व्याकरणम् [Group - B : Grammar]

**द्वादशं पत्रम् : व्याकरणपरम्परा (1)** — **पूर्णाङ्काः 100**
**Paper- XII : Vyakaranaparampara (1)** — **समयः 3 होराः (3 Hours)**

घटकम्-1 : शाकटायनः, आपिशलिः, काशकृत्स्नः, व्याडिः, पाणिनिः, कात्यायनः, पतञ्जलिः। **20 अंकाः**

घटकम्-2 : जयादित्यः (काशिकाकारः), वामनः (काशिकाकारः), जिनेन्द्रबुद्धिः (न्यासकारः), हरदत्तः (पदमञ्जरीकारः), रामचन्द्रः (प्रक्रियाकौमुदी-लेखकः), भट्टोजिदीक्षितः (सिद्धान्तकौमुदी-लेखकः), वरदराजः (मध्य-/लघु-सिद्धान्तकौमुदी-लेखकः)। **20 अंकाः**

घटकम्-3 : पाणिनिः, अष्टाध्यायी-प्रथमोऽध्यायः, प्रथमः पादः । अधोलिखितसञ्ज्ञाविधायकसूत्राणां काशिकादिशा संस्कृतमाध्यमेन सोदाहरणं व्याख्या- वृद्धिः (1.1.1), गुणः (1.1.2), संयोगः (1.1.7), अनुनासिकः (1.1.8), सवर्णम् (1.1.9), प्रगृह्यम् (1.1.11), घु (1.1.20), घ (1.1.22)। **20 अंकाः**

घटकम्-4 : भट्टोजिदीक्षितः, वैयाकरणसिद्धान्तकौमुदी (उत्तरार्द्धम्):-उणादिप्रकरणम्, प्रथमः पादः (सोदाहरणं सूत्रव्याख्या) **20 अंकाः**

घटकम्-5 : उपरितन-घटकचतुष्टयगतपाठ्यक्रममाश्रित्य चत्वारः विकल्परहिताः संक्षिप्तोत्तराः प्रश्नाः । **20 अंकाः**

**टिप्पणी :**

(क) प्रश्नानां समाधानं संस्कृत/हिन्दी/आङ्ग्लभाषामाध्यमानां केनापि एकेन माध्यमेन कर्तुं शक्यते, परन्तु तृतीयघटकस्य प्रश्नः संस्कृतमाध्यमेन एव समाधेयः अन्यथा सर्वथा अङ्कहानिः भविष्यति।

(ख) प्रथमद्वितीयघटकसम्बद्धप्रश्नयोः 100% अंशः वैकल्पिकः भवेत्। तृतीयचतुर्थघटकसम्बद्धप्रश्नयोः 50% अंशः वैकल्पिकः भवेत् । परन्तु पञ्चमघटकस्य संक्षिप्तोत्तरप्रश्नेषु न कोऽपि विकल्पो भविष्यति ।

**प्रश्नपत्रनिर्माणविधिः**

1. प्रश्नपत्रस्य निर्माणं संस्कृतमाध्यमेन भवेत् ।
2. प्रश्नपत्रे पञ्च (5) अनिवार्याः प्रश्नाः भविष्यन्ति । तत्र पञ्चमघटकसम्बद्धं पञ्चमं प्रश्नं विहाय प्रथमघटकात् प्रारभ्य चतुर्थघटकं यावत् चत्वारः प्रश्नाः प्रदास्यन्ते यत्र प्रतिप्रश्नम् उपरिनिर्दिष्टटिप्पण्यनुसारेण विकल्पो भविष्यति । पञ्चमघटकसम्बद्धः संक्षिप्तोत्तरात्मकः पञ्चमः प्रश्नः विकल्परहितो भविष्यति ।
3. प्रश्नानाम् अङ्कानां च विभाजनम् अधोलिखितरूपेण भविष्यति -

I. प्रथमघटकाश्रितः प्रश्नः - प्रथमघटकोक्तानां वैयाकरणानां कस्यचिद् एकस्य जीवनपरिचयम्, रचनाः, संस्कृतव्याकरणशास्त्रे तस्य योगदानं च अधिकृत्य लिखितुं वैयाकरणद्वयसम्बद्धौ वैकल्पिकौ प्रश्नौ प्रदास्येते । (20 अंकाः)

II. द्वितीयघटकाश्रितः प्रश्नः - द्वितीयघटकोक्तानां वैयाकरणानां कस्यचिद् एकस्य जीवनपरिचयम्, रचनाः, संस्कृतव्याकरणशास्त्रे तस्य योगदानं च अधिकृत्य लिखितुं वैयाकरणद्वयसम्बद्धौ वैकल्पिकौ प्रश्नौ प्रदास्येते । (20 अंकाः)

III. तृतीयघटकाश्रितः प्रश्नः - तृतीयघटकोक्तपाठ्यक्रमसम्बद्धं सूत्रचतुष्टयं सोदाहरणं संस्कृतमाध्यमेन व्याख्यातुं यथानिर्दिष्टग्रन्थात् षट् सूत्राणि प्रदास्यन्ते। (4x5=20अंकाः)

IV. चतुर्थघटकाश्रितः प्रश्नः - चतुर्थघटकोक्तपाठ्यक्रमसम्बद्धं सूत्रचतुष्टयं सोदाहरणं व्याख्यातुं यथानिर्दिष्टग्रन्थात् षट् सूत्राणि प्रदास्यन्ते । (4x5 = 20 अंकाः)

V. पञ्चमघटकाश्रितः प्रश्नः - पञ्चमघटकोक्तानुसारेण चत्वारः विकल्परहिताः संक्षिप्तोत्तराः प्रश्नाः प्रदास्यन्ते। (4x5= 20 अंकाः)

**अनुशंसितग्रन्थाः**


1. संस्कृत-व्याकरणशास्त्र का इतिहास (भाग 1-2), युधिष्ठिर मीमांसक, रामलाल कपूर ट्रस्ट, रेवली, सोनीपत ।
2. संस्कृत व्याकरण का उद्भव और विकास, सत्यकाम वर्मा, मोतीलाल बनारसीदास, दिल्ली।
3. संस्कृतव्याकरणदर्शन, रामसुरेश त्रिपाठी, राजकमल प्रकाशन, दिल्ली, 1972
4. पाणिनीय व्याकरण का अनुशीलन, रामशंकर भट्टाचार्य, इण्डोलोजिकल हाउस, वाराणसी, 1966
5. व्याकरणशास्त्रेतिहासः, वी० त्रिपाठी ।

6. Belvalkar, Shripada Krishna, An Account of the Different Existing Systems of Sanskrit Grammar, Bharatiya Vidya Prakashan, Varanasi.
7. George Cardona, P‚‹ini : A Survey of Research, Motilal Banarsidass, Delhi.
8. Hartmnt Scharfe, Wiesbaden; A History of Grammatical Literature, Otta Marrasowitz, 1977.
9. काशिकावृत्ति (न्यास-पदमञ्जरी-सहित), सम्पा० एवं हिन्दी टीकाकार- डॉ० जयशंकरलाल त्रिपाठी एवं सुधाकर मालवीय, तारा पब्लिकेशन, वाराणसी ।
10. काशिका, हिन्दीटीकाकार- श्रीनारायण मिश्र ।
11. अष्टाध्यायी (भाष्य) प्रथमावृत्ति (प्रथम भाग), पं० ब्रह्मदत्त जिज्ञासु, रामलाल कपूर ट्रस्ट, रेवली (सोनीपत)।
12. अष्टाध्यायी-काशिका (प्रथमाध्यायः), वेदपाल विद्याभास्कर, साहित्य भण्डार, मेरठ, 1985
13. वैयाकरणसिद्धान्तकौमुदी (उत्तरार्द्ध), भट्टोजिदीक्षित, मोतीलाल बनारसीदास, दिल्ली ।
14. उणादिकोषः, स्वामी दयानन्द, सम्पा० युधिष्ठिर मीमांसक।
15. पाणिनीयशिक्षा, व्याख्याकार- श्रीनारायण मिश्र, गोकुलदास संस्कृत ग्रन्थमाला ।
16. P‚‹in„ya†ik¹‚, Ed. & Tr. by M.M. Ghosh, Delhi, 1986.

★★★

## त्रयोदशं पत्रम् : व्याकरणदर्शनम् (1) — पूर्णाङ्काः 100
**Paper- XIII : Vyakaranadarshanam (1)** — **समयः 3 होराः (3 Hours)**

| | | |
|---|---|---|
| घटकम्-1 : | पतञ्जलिः, महाभाष्यम्, प्रथमम् आह्निकम् (पस्पशाह्निकम्) {संस्कृतमाध्यमेन} | **20 अंकाः** |
| घटकम्-2 : | भर्तृहरिः, वाक्यपदीयम् - ब्रह्मकाण्डम्, कारिकाः 1-74 | **20 अंकाः** |
| घटकम्-3 : | नागेशभट्टः, वैयाकरणसिद्धान्तपरमलघुमञ्जूषा - शक्तिनिरूपणम्, लक्षणानिरूपणम् | **20 अंकाः** |
| घटकम्-4 : | वैयाकरणसिद्धान्तपरमलघुमञ्जूषा - धात्वर्थनिर्णयः | **20 अंकाः** |
| घटकम्-5 : | उपरितन-घटकचतुष्टयगतपाठ्यक्रममाश्रित्य चत्वारः विकल्परहिताः संक्षिप्तोत्तराः प्रश्नाः । | **20 अंकाः** |

**टिप्पणी :**

(क) प्रश्नानां समाधानं संस्कृत/हिन्दी/आङ्ग्लभाषामाध्यमानां केनापि एकेन माध्यमेन कर्तुं शक्यते, परन्तु प्रथमघटकस्य प्रश्नौ संस्कृतमाध्यमेन एव समाधेयौ अन्यथा सर्वथा अङ्कहानिः भविष्यति।

(ख) प्रथमघटकात् प्रारभ्य चतुर्थघटकं यावद् व्याख्यात्मकेषु प्रश्नेषु 50% अंशः, समीक्षात्मकप्रश्नेषु च 100% अंशः वैकल्पिकः भवेत् । परन्तु पञ्चमघटकस्य संक्षिप्तोत्तरप्रश्नेषु न कोऽपि विकल्पो भविष्यति।

**प्रश्नपत्रनिर्माणविधिः**

1. प्रश्नपत्रस्य निर्माणं संस्कृतमाध्यमेन भवेत् ।
2. प्रश्नपत्रे सप्त (7) अनिवार्याः प्रश्नाः भविष्यन्ति । तत्र पञ्चमघटकसम्बद्धं पञ्चमं प्रश्नं विहाय प्रथमघटकात् प्रारभ्य चतुर्थघटकं यावत् षट् प्रश्नाः प्रदास्यन्ते यत्र प्रतिप्रश्नम् उपरिनिर्दिष्टटिप्पण्यनुसारेण विकल्पो भविष्यति । पञ्चमघटकसम्बद्धः संक्षिप्तोत्तरात्मकः सप्तमः प्रश्नः विकल्परहितो भविष्यति ।
3. प्रश्नानाम् अङ्कानां च विभाजनम् अधोलिखितरूपेण भविष्यति-

I. प्रथमघटकाश्रितं प्रश्नद्वयम् -
प्रथमः प्रश्नः - सप्रसङ्गं वार्तिकद्वयं संस्कृतमाध्यमेन व्याख्यातुं यथानिर्दिष्टग्रन्थात् वार्तिकत्रयं प्रदास्यते । (2x5=10 अंकाः)
द्वितीयः प्रश्नः - यथानिर्दिष्टग्रन्थम् आश्रित्य एकं समीक्षात्मकं प्रश्नं संस्कृतमाध्यमेन समाधातुं प्रश्नद्वयं प्रदास्यते । (10 अंकाः)

II. द्वितीयघटकाश्रितं प्रश्नद्वयम् -
प्रथमः प्रश्नः - सप्रसङ्गं कारिकाद्वयं व्याख्यातुं यथानिर्दिष्टग्रन्थात् कारिकात्रयं प्रदास्यते । (2x5 =10 अंकाः)
द्वितीयः प्रश्नः - यथानिर्दिष्टग्रन्थम् आश्रित्य एकं समीक्षात्मकं प्रश्नं समाधातुं प्रश्नद्वयं प्रदास्यते । (10 अंकाः)

III. तृतीयघटकाश्रितः प्रश्नः - सप्रसङ्गम् अवतरणद्वयं व्याख्यातुं यथानिर्दिष्टग्रन्थात् अवतरणत्रयं प्रदास्यते। (2x10 =20 अंकाः)

अथवा

यथानिर्दिष्टग्रन्थम् आश्रित्य एकं समीक्षात्मकं प्रश्नं समाधातुं प्रश्नद्वयं प्रदास्यते । (20 अंकाः)

IV. चतुर्थघटकाश्रितः प्रश्नः – सप्रसङ्गम् अवतरणद्वयं व्याख्यातुं यथानिर्दिष्टग्रन्थात् अवतरणत्रयं प्रदास्यते। (2x10 =20 अंकाः)

अथवा

यथानिर्दिष्टग्रन्थम् आश्रित्य एकं समीक्षात्मकं प्रश्नं समाधातुं प्रश्नद्वयं प्रदास्यते। (20 अंकाः)

V. पञ्चमघटकाश्रितः प्रश्नः – पञ्चमघटकोक्तानुसारेण चत्वारः विकल्परहिताः संक्षिप्तोत्तराः प्रश्नाः प्रदास्यन्ते । (4x5=20 अंकाः)

**अनुशंसितग्रन्थाः**


1. व्याकरणमहाभाष्यम् (भाग-1), सम्पा० वेदव्रत, हरियाणा साहित्य संस्थान, गुरुकुल झज्जर, 1962
2. महाभाष्यम् (प्रथमो भागः), व्याख्या० युधिष्ठिर मीमांसक, रामलाल कपूर ट्रस्ट, रेवली, सोनीपत ।
3. व्याकरणमहाभाष्य (कैयट-कृत 'प्रदीप' तथा नागेश-कृत 'उद्द्योत' सहित, भाग-1), सम्पा० आर० के० शास्त्री तथा डी० कुदाल, वाराणसी, 1987
4. व्याकरणमहाभाष्यम् (आह्निक 1-5), व्याख्या० तथा सम्पा० मथुराप्रसाद मिश्र, चौखम्बा विद्याभवन, वाराणसी ।
5. व्याकरणमहाभाष्य (आह्निक 1-2), संस्कृत व्याख्याकार माधव शास्त्री भाण्डारी, हिन्दी व्याख्या० वेदप्रकाश विद्यावाचस्पति, मेहरचन्द लछमनदास पब्लिकेशन्स, दिल्ली ।
6. पातञ्जल महाभाष्य में प्रत्याख्यात सूत्र : एक समीक्षात्मक अध्ययन, भीमसिंह वेदालंकार, निर्मल बुक एजेन्सी, कुरुक्षेत्र, 1987
7. पातञ्जल महाभाष्य में अपूर्व कल्पनाएँ, भीमसिंह वेदालंकार, परिमल प्रकाशन, दिल्ली, 1988
8. व्याकरणशास्त्रीय लोकन्यायरत्नाकर, भीमसिंह वेदालंकार, पेनमैन पब्लिशर्स, दिल्ली, 2001
9. संस्कृतव्याकरणदर्शन, भीमसिंह वेदालंकार, विद्यानिधि शोध संस्थान, शीला कॉलोनी, कुरुक्षेत्र, 2006
10. व्याकरणमहाभाष्य : विद्यानिधि हिन्दी व्याख्या, भीमसिंह वेदालंकार, विद्यानिधि शोध संस्थान, शीला कॉलोनी, कुरुक्षेत्र, 2004
11. वाक्यपदीयम् (ब्रह्मकाण्डम्), हिन्दी व्याख्या० रामगोविन्द शुक्ल, काशी संस्कृत ग्रन्थमाला ।
12. वाक्यपदीयम् (ब्रह्मकाण्डम्), व्याख्या० वामदेवाचार्य, कृष्णदास अकादमी, वाराणसी ।
13. वाक्यपदीयम् (ब्रह्मकाण्डम्), हिन्दी व्याख्या० शिवशङ्कर अवस्थी, चौखम्बा विद्याभवन, वाराणसी, 1990
14. भाषातत्त्व और वाक्यपदीय, सत्यकाम वर्मा, भारतीय प्रकाशन, दिल्ली, 1983
15. V,kyapad„ya of Bhart±hari, Ed. K.A.S. Iyer, Delhi, 1964.
16. V,kyapad„ya of Bhart±hari (with the Comms : V±tti & Paddhati), Ed. K.A.S. Iyer, Pune, 1995.
17. परमलघुमञ्जूषा, संस्कृत व्याख्याकार पं० कालिकाप्रसाद शुक्ल, बडौदा, 1961
18. वैयाकरणसिद्धान्तपरमलघुमञ्जूषा, व्याख्याकार तथा सम्पा० डॉ० कपिलदेव शास्त्री, कुरुक्षेत्र विश्वविद्यालय प्रकाशन, कुरुक्षेत्र, 1975
19. परमलघुमञ्जूषा, सम्पा० जे० एल० त्रिपाठी, वाराणसी, 1985
20. परमलघुमञ्जूषा (टिप्पणीसहित), सम्पा० अलखदेव शर्मा, वाराणसी, 1981
21. P.C. Chakravarti, The Philosophy of Sanskrit Grammar, Kolkata.
22. Gaurinath Shastri, The Philosophy of Word and Meaning, Kolkata.
23. Gaurinath Shastri, A Study in the Dialectics of Spho⁰a, Motilal Banarsidass, Delhi, 1980.
24. व्याकरणदर्शनभूमिका, रामाज्ञा पाण्डेय, सम्पूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी ।
25. व्याकरण की दार्शनिक भूमिका, सत्यकाम वर्मा, मुंशीराम मनोहरलाल, दिल्ली, 1971


★★★

## चतुर्दशं पत्रम् : व्याकरणप्रक्रिया (1) पूर्णाङ्काः 100

**Paper- XIV : Vyakaranaprakriya (1)** **समयः 3 होराः (3 Hours)**

घटकम्-1 : भट्टोजिदीक्षितः, वैयाकरणसिद्धान्तकौमुदी (पूर्वार्द्धम्) (बालमनोरमा-तत्त्वबोधिनीसहिता) :- **20 अंकाः**
अजन्तपुंलिङ्गप्रकरणाद् आरभ्य अजन्तनपुंसकलिङ्गप्रकरणं यावत्-
सोदाहरणं सूत्र-वार्तिक-व्याख्या (पंक्तीः फक्किकाश्च वर्जयित्वा);
सूत्र/वार्तिक-उल्लेखपूर्वकं रूपसिद्धिश्च ।

घटकम्-2 : वैयाकरणसिद्धान्तकौमुदी (पूर्वार्द्धम्) (बालमनोरमा-तत्त्वबोधिनीसहिता) :- **20 अंकाः**
स्त्रीप्रत्ययप्रकरणम्- संस्कृतमाध्यमेन सोदाहरणं सूत्र-वार्तिक-व्याख्या (पंक्तीः फक्किकाश्च वर्जयित्वा); सूत्र/वार्तिक-उल्लेखपूर्वकं स्त्रीप्रत्ययस्य प्रतिपादनं च ।

घटकम्-3 : वैयाकरणसिद्धान्तकौमुदी (पूर्वार्द्धम्) (बालमनोरमा- तत्त्वबोधिनीसहिता):- **20 अंकाः**
समासः - अव्ययीभावसमासप्रकरणम्, तत्पुरुषसमासप्रकरणम्-
सोदाहरणं सूत्र-वार्तिक-व्याख्या (पंक्तीः फक्किकाश्च वर्जयित्वा);
सूत्र/वार्तिक-उल्लेखपूर्वकं रूपसिद्धिश्च ।

घटकम्-4 : वैयाकरणसिद्धान्तकौमुदी (पूर्वार्द्धम्) (बालमनोरमा- तत्त्वबोधिनीसहिता):- **20 अंकाः**
तद्धितेष्वपत्याधिकारप्रकरणे 'समर्थानां प्रथमाद् वा' (सूत्रसंख्या 1072) इति

सूत्राद् आरभ्य 'क्षुद्राभ्यो वा' (सूत्रसंख्या 1137) इति सूत्रं यावत्-सोदाहरणं सूत्र-वार्तिक-व्याख्या (पंक्ती: फक्किकाश्च वर्जयित्वा); सूत्र/वार्तिक-उल्लेखपूर्वकं रूपसिद्धिश्च ।

घटकम्-5 : उपरितन-घटकचतुष्टयगतपाठ्यक्रममाश्रित्य चत्वारः विकल्परहिताः संक्षिप्तोत्तराः प्रश्नाः । **20 अंकाः**

**टिप्पणी :**

(क) प्रश्नानां समाधानं संस्कृत/हिन्दी/आङ्ग्लभाषामाध्यमानां केनापि एकेन माध्यमेन कर्तुं शक्यते, परन्तु द्वितीयघटकस्य प्रश्नाः संस्कृतमाध्यमेन एव समाधेयाः अन्यथा सर्वथा अङ्कहानिः भविष्यति।

(ख) चतुर्थघटकं यावत् सूत्रव्याख्यात्मकेषु रूपसिद्धिप्रक्रियासम्बद्धेषु च प्रश्नेषु 50% अंशः वैकल्पिकः भवेत्, परन्तु पञ्चमघटकस्य संक्षिप्तोत्तरप्रश्नेषु न कोऽपि विकल्पो भविष्यति।

**प्रश्नपत्रनिर्माणविधिः**

1. प्रश्नपत्रस्य निर्माणं संस्कृतमाध्यमेन भवेत् ।
2. प्रश्नपत्रे नव (9) अनिवार्याः प्रश्नाः भविष्यन्ति । तत्र प्रथमघटकात् प्रारभ्य चतुर्थघटकं यावत् प्रतिघटकं प्रश्नद्वयं भविष्यति । पञ्चमघटकम् आश्रित्य च एकः प्रश्नः भविष्यति यत्र घटकचतुष्टयगतपाठ्यक्रमानुसारेण विकल्परहिताः चत्वारः संक्षिप्तोत्तराः प्रश्नाः प्रदास्यन्ते ।
3. प्रश्नानाम् अङ्कानां च विभाजनम् अधोलिखितरूपेण भविष्यति-

I. प्रथमघटकाश्रितं प्रश्नद्वयम् -

प्रथमः प्रश्नः - प्रथमघटकोक्तप्रकरणसम्बद्धं सूत्रद्वयं सोदाहरणं व्याख्यातुं यथानिर्दिष्टग्रन्थात् सूत्रत्रयं प्रदास्यते । (2x4=8 अंकाः)

द्वितीयः प्रश्नः - प्रथमघटकोक्तप्रकरणसम्बद्धानां त्रयाणां पदानां प्रमुखसूत्रोल्लेखपूर्वकं रूपसिद्धिप्रक्रियां लिखितुं यथानिर्दिष्टग्रन्थात् पञ्च (5) पदानि प्रदास्यन्ते । (3x4=12 अंकाः)

II. द्वितीयघटकाश्रितं प्रश्नद्वयम् -

प्रथमः प्रश्नः - द्वितीयघटकोक्तप्रकरणसम्बद्धं सूत्रद्वयं संस्कृतमाध्यमेन सोदाहरणं व्याख्यातुं यथानिर्दिष्टग्रन्थात् सूत्रत्रयं प्रदास्यते । (2x4=8 अंकाः)

द्वितीयः प्रश्नः - द्वितीयघटकोक्तप्रकरणसम्बद्धानां त्रयाणां पदानां संस्कृतमाध्यमेन सूत्र/वार्तिक-उल्लेखपूर्वकं स्त्रीप्रत्ययस्य प्रतिपादनाय यथानिर्दिष्टग्रन्थात् पञ्च (5) पदानि प्रदास्यन्ते । (3x4=12 अंकाः)

III. तृतीयघटकाश्रितं प्रश्नद्वयम् -

प्रथमः प्रश्नः - तृतीयघटकोक्तप्रकरणसम्बद्धं सूत्रद्वयं सोदाहरणं व्याख्यातुं यथानिर्दिष्टग्रन्थात् सूत्रत्रयं प्रदास्यते । (2x4=8 अंकाः)

द्वितीयः प्रश्नः - तृतीयघटकोक्तप्रकरणसम्बद्धानां त्रयाणां पदानां प्रमुखसूत्रोल्लेखपूर्वकं रूपसिद्धिप्रक्रियां लिखितुं यथानिर्दिष्टग्रन्थात् पञ्च (5) पदानि प्रदास्यन्ते । (3x4=12 अंकाः)

IV. चतुर्थघटकाश्रितं प्रश्नद्वयम् -

प्रथमः प्रश्नः - चतुर्थघटकोक्तप्रकरणसम्बद्धं सूत्रद्वयं सोदाहरणं व्याख्यातुं यथानिर्दिष्टग्रन्थात् सूत्रत्रयं प्रदास्यते । (2x4=8 अंकाः)

द्वितीयः प्रश्नः - चतुर्थघटकोक्तप्रकरणसम्बद्धानां त्रयाणां पदानां प्रमुखसूत्रोल्लेखपूर्वकं रूपसिद्धिप्रक्रियां लिखितुं यथानिर्दिष्टग्रन्थात् पञ्च (5) पदानि प्रदास्यन्ते । (3x4=12 अंकाः)

V. पञ्चमघटकाश्रितः प्रश्नः –

पञ्चमघटकोक्तानुसारेण चत्वारः विकल्परहिताः संक्षिप्तोत्तराः प्रश्नाः प्रदास्यन्ते । (4x5=20 अंकाः)

**अनुशंसितग्रन्थाः**


1. वैयाकरणसिद्धान्तकौमुदी (बालमनोरमा-तत्त्वबोधिनी-सहिता) (पूर्वार्द्धम्), भट्टोजिदीक्षित, मोतीलाल बनारसीदास, दिल्ली।
2. वैयाकरणसिद्धान्तकौमुदी (भाग 1-2), व्याख्या० गोपालदत्त पाण्डेय, चौखम्बा सुरभारती, वाराणसी ।
3. वैयाकरणसिद्धान्तकौमुदी (समासप्रकरणम्), व्याख्या० आचार्य जगदीश शास्त्री तथा मधुबाला शर्मा, मोतीलाल बनारसीदास, दिल्ली ।
4. Siddh,ntakaumud„ (Vol. I), Eng. Tr. S.C. Vasu, Motilal Banarsidass, Delhi.


★★★

**पञ्चदशं पत्रम् : व्याकरणप्रक्रिया (2)** **पूर्णाङ्काः 100**
**Paper- XV : Vyakaranaprakriya (2)** **समयः 3 होराः (3 Hours)**

घटकम्-1 : भट्टोजिदीक्षितः, वैयाकरणसिद्धान्तकौमुदी (उत्तरार्द्धम्) (बालमनोरमा-तत्त्वबोधिनीसहिता):- **20 अंकाः**
अधःपरिगणितधातूनां संस्कृतमाध्यमेन (क) सूत्र/वार्तिक-उल्लेखपूर्वकं रूपसिद्धिः;
(ख) तत्सम्बद्धानां सूत्राणां वार्तिकानां च सोदाहरणं व्याख्या (पंक्तीः फक्किकाश्च वर्जयित्वा)-
तिङन्ते भ्वादिप्रकरणम् - भू (1), एध (2), व्रज (253), कमु (443), जि (561), वृतु (758) ।

घटकम्-2 : वैयाकरणसिद्धान्तकौमुदी (उत्तरार्द्धम्) (बालमनोरमा-तत्त्वबोधिनीसहिता):- **20 अंकाः**
अधःपरिगणितधातूनां (क) सूत्र/वार्तिक-उल्लेखपूर्वकं रूपसिद्धिः;
(ख) तत्सम्बद्धानां सूत्राणां वार्तिकानां च सोदाहरणं व्याख्या (पंक्तीः फक्किकाश्च वर्जयित्वा)-
तिङन्ते भ्वादिप्रकरणम् - हृञ् (899), णीञ् (901), गै (917), पा (925), घ्रा (926), ष्ठा (928), दाण् (930), डुलभष् (975), गम्लृ (982), दृशिर् (988), डुपचष् (996), यज (1002), वस (1005), वद (1009) ।

घटकम्-3 : वैयाकरणसिद्धान्तकौमुदी (उत्तरार्द्धम्) (बालमनोरमा-तत्त्वबोधिनीसहिता):- **20 अंकाः**
अधःपरिगणितधातूनां (क) सूत्र/वार्तिक-उल्लेखपूर्वकं रूपसिद्धिः;
(ख) तत्सम्बद्धानां सूत्राणां वार्तिकानां च सोदाहरणं व्याख्या (पंक्तीः फक्किकाश्च वर्जयित्वा)-
(क) तिङन्ते अदादिप्रकरणम्- दुह (1014), आस (1021), शीङ् (1032), इण् (1045) ।
(ख) जुहोत्यादिप्रकरणम्- ओहाक् (1090), डुधाञ् (1092) ।

घटकम्-4 : वैयाकरणसिद्धान्तकौमुदी (उत्तरार्द्धम्) (बालमनोरमा-तत्त्वबोधिनीसहिता):- **20 अंकाः**
अधोनिर्दिष्टप्रकरणान्तर्गतानां पदानां सूत्र/वार्तिक-उल्लेखपूर्वकं रूपसिद्धिः;
सम्बद्धानां सूत्राणां वार्तिकानां च सोदाहरणं व्याख्या (पंक्तीः फक्किकाश्च वर्जयित्वा)-
तिङन्ते- (क) णिच्प्रकरणम्; (ख) सन्प्रकरणम् ।

घटकम्-5 : उपरितन-घटकचतुष्टयगतपाठ्यक्रममाश्रित्य चत्वारः विकल्परहिताः संक्षिप्तोत्तराः प्रश्नाः । **20 अंकाः**

**टिप्पणी :**

(क) प्रश्नानां समाधानं संस्कृत/हिन्दी/आङ्ग्लभाषामाध्यमानां केनापि एकेन माध्यमेन कर्तुं शक्यते, परन्तु प्रथमघटकस्य प्रश्नाः संस्कृतमाध्यमेन एव समाधेयाः अन्यथा सर्वथा अङ्कहानिः भविष्यति।

(ख) चतुर्थघटकं यावत् सूत्रव्याख्यात्मकेषु रूपसिद्धिप्रक्रियासम्बद्धेषु च प्रश्नेषु 50% अंश वैकल्पिकः भवेत्, परन्तु पञ्चमघटकस्य संक्षिप्तोत्तरप्रश्नेषु न कोऽपि विकल्पो भविष्यति।

**प्रश्नपत्रनिर्माणविधिः**

1. प्रश्नपत्रस्य निर्माणं संस्कृतमाध्यमेन भवेत् ।
